मद + ल्युः । मनसि आनन्दजनकत्वादस्य तथात्वम् । यथा, महाभारते । १३ । १७ । ६८ ।
"उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः ॥"
मत्तता । वरारोहाणां कामिनीनां भावविशेषः इति यावत् । यथा, महाभारते । ३ । ४६ । १३ ।
"सीधुपानेन चाल्पेन तुष्टाथ मदनेन च ।
विलासनैश्च विविधैः प्रेक्षणीयतराभवत् ॥")
वसन्तः । धुस्तूरः । सिक्थकम् । इति मेदिनी । ने । १०३ ॥ वृक्षभेदः । मयना इति भाषा । तत्पर्य्यायः । पिचुकः२ सुचुकुन्दः३ कण्टकी४ । इति रत्नमाला ॥ पिण्डीतकः ५ । (तथाचास्य पर्य्यायान्तरं गुणाश्च ।
"मदनः छर्द्दनः पिण्डो नटः पिण्डीतकस्तथा ।
करहाटो मरुवकः शल्यको विषपुष्पकः ॥
मदनो मधुरस्तिक्तो वीर्य्योष्णो लेखनो लघुः ।
वान्तिकृद्विद्रधिहरः प्रतिश्यायव्रणान्तकः ॥
रूक्षः कुष्ठकफानाहशोथगुल्मव्रणापहः ॥"
धुस्तूरार्थे पर्य्यायो यथा,—
"धत्तूरधूर्त्तधुत्तूरा उन्मत्तः कनकाह्वयः ।
देवता कितवस्तूरी महामोहः शिवप्रियः ॥
मातुलो मदनश्चास्य फले मातुलपुत्त्रकः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
मरुवकः६ श्वसनः ७ करहाटकः ८ शल्यः ६ । इत्यमरः । २ । ४ । ५२—५३ ॥ भ्रमरः । इति जटाधरः ॥ माषः । इति हेमचन्द्रः ॥ खदिरवृक्षः । इति शब्दचन्द्रिका ॥ मदनोठ-वृक्षः । वकुलवृक्षः । वृक्षविशेषः । मयनाफल इति भाषा । तत्पर्य्यायः । शल्यः २ कैटर्य्यः ३ पिण्डः ४ धाराफलः ५ तगरः ६ करहाटः ७ पिण्डीतकः ८ श्वसनः ६ मरुवकः १० । अस्य गुणाः । वमिकारकत्वम् । तिक्तत्वम् । उष्णवीर्य्यत्वम् । लेखनत्वम् । लघुत्वम् । रूक्षत्वम् । कुष्ठकफानाहशोफगुल्मव्रणापहत्वञ्च । इति राजनिर्घण्टः ॥ आलिङ्गनविशेषः । तल्लक्षणम् । नायको नायिकायाः कण्ठे हस्तं दत्त्वा द्वितीयहस्तं तस्या मध्यदेशे दत्त्वा यदाश्लिषति । इति कामशास्त्रम् ॥ ("अथ मयनम् ।" मम् इति भाषा ।
"मयनन्तु मधूच्छिष्टं मधुशेषञ्च सिक्थकम् ।
मध्वाधारो मदनकं मधूषितमपि स्मृतम् ॥
मदनं मृदुसुस्निग्धं भूतघ्नं व्रणरोपणम् ।
भग्नसन्धानकृद्वातकुष्ठवीसर्परक्तजित् ॥"
इति च भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥ मण्डलिसर्पान्तर्गतसर्पविशेषः ॥ "शिशुको मदनः पालिहिरः इत्यादि ।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥)

मदनकः, पुं, (मदयतीति मद + णिच् + ल्युः स्वार्थे कः ।) दमनकवृक्षः । इति रत्नमाला ॥ (सिक्थकार्थे क्ली । तत्पर्य्यायो यथा,—
"मयनन्तु मधूच्छिष्टं मधुशेषञ्च सिक्थकम् ।
मध्वाधारो मदनकं मधूषितमपि स्मृतम् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥)

मदनकाकुरवः, पुं, (मदनेन हेतुना काकुः कामजन्यो विकृतो रवः अस्फुटध्वनिर्यस्य ।) पारावतः । इति राजनिर्घण्टः ॥

मदनगोपालः, पुं, (मदनश्चासौ गोपालश्चेति । भक्तचित्तोन्मादकारित्वादस्य तथात्वम् ।) श्रीकृष्णः । यथा,—
"वन्दे मदनगोपालं कैशोराकारमद्भुतम् ।"
इति पाद्मे पातालखण्डे ६ अध्यायः ॥

मदनचतुर्द्दशी, स्त्री, (मदनोत्सवात्मिका चतुर्द्दशी ।) चैत्रशुक्लचतुर्द्दशी । यथा । अथ मदनचतुर्द्दशी तत्र मदनस्य पूजा कार्य्या । स्कन्दपुराणसौरागमयोः ।
"मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्द्दशी ।
प्रोक्ता मदनभञ्जीति सिद्धिदा तु महोत्सवे ॥
पूजयिष्यन्ति ये मर्त्त्यास्तदङ्गभवपल्लवैः ।
ते यान्ति परमं स्थानं मदनस्य प्रभावतः ॥
चैत्रे मासि चतुर्द्दश्यां मदनस्य महोत्सवः ।
जुगुप्सितोक्तिभिस्तत्र गीतवाद्यादिभिर्नृणाम् ।
भगवांस्तुष्यते कामः पुत्त्रपौत्त्रसमृद्धिदः ॥
वलिं प्रति भगवद्वाक्यम् ।
न मानयन्ति ये पर्ब्ब मादनं मानवाधमाः ।
तेषां पुण्यं फलं दत्तं मया ते चैत्रमासिकम् ॥
देवलः ।
चैत्रशुक्लचतुर्द्दश्यां यः स्नायाच्छिवसन्निधौ ।
पिशाचत्वं न तस्य स्यात् गङ्गायाञ्च विशेषतः ॥"
इति तिथितत्त्वम् ॥

मदनत्रयोदशी, स्त्री, (मदनपूजार्था त्रयोदशी ।) चैत्रशुक्लत्रयोदशी । तत्र मदनस्य व्रतं कर्त्तव्यम् । यथा भविष्ये ।
"चैत्रशुक्लत्रयोदश्यां मदनं दमनात्मकम् ।
कृत्वा संपूज्य विधिवद्वीजयेद्व्यजनेन तु ॥
तत्र सम्पूजितः कामः पुत्त्रपौत्त्रविवर्द्धनः ।
कामदेवस्त्रयोदश्यां पूजनीयो यथाविधि ।
रतिप्रीतिसमायुक्तो ह्यशोकमणिभूषितः ॥"
दमनो दमनकवृक्षः । सम्पूजितः प्रीणितः । कामदेवध्यानन्तु ।
"चापेषुधृक् कामदेवो रूपवान् विश्वमोहनः ।"
तत्र स्तुतिमन्त्रः ।
"पुष्पधन्वन् ! नमस्तेऽस्तु नमस्ते मीनकेतन ! ।
मुनीनां लोकपालानां धैर्य्यच्युतिकृते नमः ॥
माधवात्मज ! कन्दर्प ! शम्बरारे ! रति-
प्रिय ! ।
नमस्तुभ्यं जिताशेषभुवनाय मनोभुवे ॥
आधयो मम नश्यन्तु व्याधयश्च शरीरजाः ।
सम्पद्यतामभीष्टं मे सम्पदः सन्तु मे स्थिराः ॥
नमो माराय कामाय देवदेवस्य मूर्त्तये ।
ब्रह्मविष्णुशिवेन्द्राणां मनःक्षोभकराय च ॥
एवं यः कुरुते पूजामनङ्गस्य महात्मनः ।
भवन्ति नापदस्तस्य तस्मिन्नब्दे कदाचन ॥"
इति तिथितत्त्वम् ॥

मदनद्वादशी, स्त्री, (मदनपूजाविषयिणी द्वादशी ।) चैत्रशुक्लद्वादशी । अत्र मदनव्रतं कार्य्यम् । यथा,
ऋषय ऊचुः ।
"श्रोतुमिच्छामहे सूत ! मदनद्वादशीव्रतम् ।
सुतानेकोनपञ्चाशत् येन लेभे दितिः पुनः ॥
सूत उवाच ।
यद्वशिष्ठादिभिः पूर्ब्बं दितेः कथितमुत्तमम् ।
विस्तरेणैतदेवेदं मत्सकाशान्निबोधत ॥
चैत्रे मासि सिते पक्षे द्वादश्यां नियतव्रतः ।
स्थापयेदव्रणं कुम्भं सिततण्डुलपूरितम् ॥
नानाफलयुतं तद्वदिक्षुदण्डसमन्वितम् ।
सितवस्त्रयुगच्छन्नं सितचन्दनचर्च्चितम् ॥
नानाभक्ष्यफलोपेतं सहिरण्यञ्च शक्तितः ।
ताम्रपात्रं शुभोपेतं तस्योपरि निवेदयेत् ॥
तस्मादुपरि कामन्तु कदलीदलसंस्थितम् ।
कुर्य्याच्छर्करयोपेतां रतिं तस्य च वामतः ॥
गन्धधूपं ततो दद्यात् गीतवाद्यञ्च कारयेत् ।
तदभावे कथां कुर्य्यात् कामकेशवयोर्नरः ॥
कामनाम्ना हरेरर्च्चां स्नापयेद् गुड़वारिणा ।
शुक्लपुष्पाक्षततिलैरर्च्चयेन्मधुसूदनम् ॥
कामाय पादौ संपूज्य जंघे सौभाग्यदाय च ।
ऊरू स्मरायेति पुनर्म्मन्मथायेति वै कटिम् ॥
स्वच्छोदरायेत्युदरं अनङ्गायेत्युरो हरेः ।
मुखं पद्ममुखायेति बाहू पञ्चशराय वै ॥
नमः सर्व्वात्मने मौलिमर्च्चयेदिति केशवम् ।
ततः प्रभाते तं कुम्भं ब्राह्मणाय निवेदयेत् ॥
ब्राह्मणान् भोजयेद्भक्त्या स्वयञ्च लवणाहते ।
भुक्त्वाथ दक्षिणां दद्यादिमं मन्त्रमुदीरयेत् ॥
प्रीयतामत्र भगवान् कामरूपी जनार्द्दनः ।
हृदये सर्व्वभूतानामानन्दो यो विधीयते ॥
अनेन विधिना सर्व्वं मासि मासि समाचरेत् ।
उपवासी त्रयोदश्यामर्च्चयेद् विष्णुमव्ययम् ॥
फलमेकञ्च संप्राश्य द्वादश्यां भूतले स्वपेत् ।
ततस्त्रयोदशे मासि घृतं धेनुसमन्वितम् ॥
शय्यां दद्यादनङ्गाय सर्व्वोपस्करसंयुताम् ।
काञ्चनं कामदेवञ्च शुक्लां गाञ्च पयस्विनीम् ॥
वासोभिर्द्विजदाम्पत्यं पूज्य शक्त्या विभूषणैः ।
शय्यां गवादिकं दद्यात् प्रीयतामित्युदीरयेत् ॥
होमं शुक्लैस्तिलैः कुर्य्यात् कामनामानि कीर्त्तयन् ।
गव्येन सर्पिषा चैव पायसेन च धर्म्मवित् ॥
विप्रेभ्यो भोजनं दद्याद्वित्तशाठ्यविवर्ज्जितः ।
इक्षुदण्डानथो दद्यात् पुष्पमालाश्च शक्तितः ॥
यः कुर्य्याद्विधिनानेन मदनद्वादशीमिमाम् ।
सर्व्वपापविनिर्म्मुक्तः प्राप्नोति हरिसाम्यताम् ।
इह लोके वरान् पुत्त्रान् सौभाग्यञ्च समश्नुते ॥"
इति मत्स्यपुराणे ७ अध्यायः ॥

मदनपाठकः, पुं, (मदनं तदुद्दीपकं पठतीति । पठ + ण्वुल् । स्वरेण कामोद्दीपनात्तथात्वम् ।) कोकिलः । इति राजनिर्घण्टः ॥

मदनमोहनः पुं, (मदन उन्मादकश्चासौ मोहनश्चेति कर्म्मधारयः । मुह् + णिच् ल्युः ।) श्रीकृष्णः । यथा,—